कपिलः श्लोकसंख्यया । त्रयोदश सहस्राणि कलोत्तर शतत्रयम् । श्लोकसंख्या समुद्दिष्टा योगे कक्षे च संख्यया । वाणसंख्या सहस्राणि श्लोका नवतिः कीर्त्तिताः । श्लोकानान्तु सहस्राणि अष्टाविंशतिसंख्यया । श्लोकाश्च भानु १२ संख्याता स्तन्त्रेऽपि च कपिञ्जले । अमृतशुद्धौ सहस्राणि पञ्चश्लोकाधिकानि च । पञ्चैव कथिता नेत्र संख्यातानि यथार्थतः । वीरागमे षड्धिकानि शतानि परिसंख्यया । सहस्राणि च तावन्ति श्लोकानान्तु यथार्थतः । पञ्चाधिकसहस्राणि श्लोकानाममृतसंख्यया । सिद्धसंवरणोक्तानि ईश्वरेण यथा पुरा । डामरः षड्विधो ज्ञेयः प्रथमो योगडामरः । श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्च शतानि च । त्रिविंशतिसहस्राणि श्लोकानि चेह संख्यया । एकादश सहस्राणि संख्यया शिवडामरे । श्लोकाःसप्तैव निश्चित्य ईश्वरेणैव भाषिताः । तावच्छ्लोकसहस्राणि पञ्च श्लोकशतानि च । गुणोत्तराणि दुर्गाया डामरे कथितानि च । नव श्लोकसहस्राणि नव श्लोकशतानि च । सारस्वते तथा श्लोकाः पञ्चैव परिकीर्त्तिताः । स्वर७संख्यसहस्राणि श्लोकानां ब्रह्मडामरे । पञ्चोत्तरशतान्यत्र संख्यातानि शिवेन तु । षष्टिः श्लोकसहस्राणि गन्धर्वडामरोत्तरे । श्लोकाश्च षष्टिसंख्याता ब्रह्मणाऽव्यक्तयोनिना । यामलाः षट् समाख्यातास्तत्रादावादियामले । द्वात्रिंशच्च सहस्राणि त्रयस्त्रिंशत् शतानि च । द्वितीये ब्रह्मसंज्ञे तु द्वाविंशतिश्च संख्यया । सहस्राणि शतान्यत्र तान्येव कथितानि च । तावत्संख्यसहस्राणि शतानि परिसंख्यया । विंशतिश्च तथा संख्या श्लोकाश्च विष्णुयामले । कालसंख्यसहस्राणि वेदसंख्यशतानि च । पञ्चषष्टिस्तथा श्लोका कनिष्ठे रुद्रयामले । नव श्लोकसहस्राणि त्रयोदश शतानि च । द्वाविंशतिस्तथा श्लोका गणेशयामलोत्तमे । रविसंख्यसहस्राणि आदित्याख्ये तु यामले । तन्त्रे नीलपताकायां सहस्राणि च पञ्च च । पञ्चविंशतिः श्लोकाश्च कथिता वासकेश्वरे । त्रयोदश सहस्राणि द्वे शते विंशतिस्तथा । श्लोकास्तत्वक्षये तन्त्रे संख्यातास्तन्त्रवेदिभिः । गजसंख्यसहस्राणि त्रिकसंख्याशतानि च । सप्त श्लोकास्तथैवात्र तत्त्वयोगार्णवोत्तमे । दश श्लोकसहस्राणि तावन्त्येव शतानि च । मायाख्ये च महातन्त्रे यथार्थतः प्रकीर्त्तिताः । पञ्च श्लोकसहस्राणि तावन्त्येव शतानि च । शतार्द्धसंख्यया श्लोका दक्षिणामूर्त्तितन्त्रके । दश श्लोकसहस्राणि तावन्त्येव शतानि च । त्रयोदश तथा श्लोकाः कालिकाख्ये च तन्त्रके । कालेश्वर्य्यास्तन्त्रवरे सहस्रत्रितयं महत् । श्लोकानां संख्यया चात्र तन्त्रराजे च संख्यया । नव श्लोकसहस्राणि नव श्लोकशतानि च । द्वाविंशतिः सहस्राणि हरगौर्य्याख्यतन्त्रके । तथा च विंशतिः श्लोकास्तन्त्रेऽस्मिन् परिकीर्त्तिताः । अर्कसङ्ख्यसहस्राणि द्वितीये तन्त्रवेदिभिः । अष्टाविंशतिश्च श्लोकाः संख्यातास्तन्त्रनिर्णये । कुब्जिकाख्ये महातन्त्रे श्लोकाश्च दशसंख्यया । सहस्राणि तथा सप्त संख्यातानि मनीषिभिः । द्वितीये षट्सहस्राणि तदर्द्धञ्च कनिष्ठके । अर्कसंख्यसहस्राणि तथाङ्कशतानि च । तावद्देव्याः महातन्त्रे संख्यातानि द्विजोत्तमैः । द्वात्रिंशतिः सहस्राणि द्वाविंशतिः शतानि च । कात्यायन्यास्तु तन्त्रस्य संख्यातानि मनीषिभिः । वसुश्लोकसहस्राणि तावन्त्येव शतानि च । प्रत्यङ्गिरायास्तन्त्रे च निश्चितानि यथार्थतः । भूतसंख्या सहस्राणि तथा तावच्छतानि च । महालक्ष्म्याः स्तन्त्रराजे पञ्च श्लोकाश्च कीर्त्तिताः । गजसंख्यसहस्राणि श्लोकका सप्तसंख्यया । त्रिपुरार्णवे महातन्त्रे लिखिताः परमर्षिभिः । सरस्वत्याः सहस्रे द्वे द्वे शते संख्यया स्मृते । पञ्च श्लोकास्तथैवात्र विज्ञातव्या द्विजातिभिः । द्वाविंशतिः सहस्राणि आद्ये तन्त्रोत्तमोत्तरे । अङ्कसंख्या शतान्यत्र श्लोकाः पञ्चदशैव तु । द्वात्रिंशतिः सहस्राणि तथा नव शतानि च । द्वात्रिंशच्च तथा श्लोका योगिन्यास्तन्त्रराजके । द्वितीये षट् सहस्राणि तथा च त्रिशतानि च । त्रयः श्लोकास्तथैवात्र वाराह्यास्तन्त्र उत्तमे । ऊर्म्मिसंख्यासहस्राणि तत्त्वसंख्यशतानि च । गवाक्षे तन्त्रराजेऽस्मिन् श्लोकाश्चिह तत्त्वसंख्यया । वर्णसंख्यसहस्राणि द्वे शते परिनिश्चिते । श्लोकास्त्रयश्च संख्यातास्तन्त्रे नारायणीयके । वेदसंख्यसहस्राणि तान्येव च शतानि च । श्लोका नवतिःसंख्याता मृडानी तन्त्रराजके । द्वितीये त्रिसहस्राणि त्रिशतानि कनिष्ठके । त्रिंशत् श्लोकाश्च संख्याताश्चातव्यास्तन्त्रवेदिभिः” । वाराहीत० ॥

उपतन्त्राणि यथा “सैद्धोक्तान्युपतन्त्राणि कपिलोक्तानि यानि च । अद्भुतानि च एतानि जैमिन्युक्तानि यानि च । वशिष्ठः कपिलश्चैव नारदो गर्ग एव च । पुलस्त्यो-भार्गवः सिद्धो याज्ञवल्क्योभृगुस्तथा । शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः । एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च । त्रिसंख्यातानि तान्यत्र धर्मविज्ञि-